# Niralamba Upanishad

# નિરાલમ્બોપનિષત્

## Document Information

Text title : Niralamba Upanishad

File name : niralamba.itx

Category : upanishhat

Location : doc_upanishhat

Author : Vedic tradiotion

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 34/108; Shukla Yajurveda Samanya upanishad.

Latest update : Jan. 13, 2000

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

December 22, 2023

*sanskritdocuments.org*

# નિરાલમ્બોપનિષત્

યત્રાલમ્બાલમ્બિભાવો વિદ્યતે ન કદાચન ।
જ્ઞવિજ્ઞસમ્યગ્જ્ઞાલમ્બં નિરાલમ્બં હરિં ભજે ॥

ૐ પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્પૂર્ણમુદચ્યતે ।
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ નમઃ શિવાય ગુરવે સચ્ચિદાનન્દ મૂર્તયે ।
નિષ્પ્રપઞ્ચાય શાન્તાય નિરાલમ્બાય તેજસે ॥

નિરાલમ્બં સમાશ્રિત્ય સાલમ્બં વિજહાતિ યઃ ।
સ સંન્યાસી ચ યોગી ચ કૈવલ્યં પદમશ્નુતે ।
એષમજ્ઞાનજન્તૂનાં સમસ્તારિષ્ટશાન્તયે ।
યદ્યદ્બોદ્ધવ્યમખિલં તદાશઙ્ક્ય બ્રવીમ્યહમ્ ॥

કિં બ્રહ્મ । ક ઈશ્વરઃ । કો જીવઃ । કા પ્રકૃતિઃ ।
કઃ પરમાત્મા । કો બ્રહ્મા । કો વિષ્ણુઃ । કો રુદ્રઃ ।
ક ઇન્દ્રઃ । કઃ શમનઃ । કઃ સૂર્યઃ । કશ્ચન્દ્રઃ ।
કે સુરાઃ । કે અસુરાઃ । કે પિશાચાઃ । કે મનુષ્યાઃ ।
કાઃ સ્ત્રિયઃ । કે પશ્વાદયઃ । કિં સ્થાવરમ્ ।
કે બ્રાહ્મણાદયઃ । કા જાતિઃ । કિં કર્મ । કિમકર્મ ।
કિં જ્ઞાનમ્ । કિમજ્ઞાનમ્ । કિં સુખમ્ । કિં દુઃખમ્ ।
કઃ સ્વર્ગઃ । કો નરકઃ । કો બન્ધઃ । કો મોક્ષઃ ।
ક ઉપાસ્યઃ । કઃ શિષ્યઃ । કો વિદ્વાન્ । કો મૂઢઃ ।
કિમાસુરમ્ । કિં તપઃ । કિં પરમં પદમ્ ।
કિં ગ્રાહ્યમ્ । કિમગ્રાહ્યમ્ । કઃ સંન્યાસીત્યાહશઙ્ક્યાહ
બ્રહ્મેતિ । સ હોવાચ મહદહઙ્કારપૃથિવ્યપ્તેજોવાય્વાકાશત્વેન
બૃહદ્રૂપેણાણ્ડકોશેન કર્મજ્ઞાનાર્થરૂપતયા

ભાસમાનમદ્વિતીયમખિલોપાધિવિનિર્મુક્તં
તત્સકલશક્ત્યુપબૃંહિતમનાદ્યનન્તં
શુદ્ધં શિવં શાન્તં નિર્ગુણમિત્યાદિ-
વાચ્યમનિર્વાચ્યં ચૈતન્યં બ્રહ્મ ॥ ઈશ્વર ઇતિ ચ ॥

બ્રહ્મૈવ સ્વશક્તિં પ્રકૃત્યભિધેયામાશ્રિત્ય
લોકાન્સૃષ્ટ્વા પ્રવિશ્યાન્તર્યામિત્વેન બ્રહ્માદીનાં
બુદ્ધીન્દ્રિયનિયન્તૃત્વાદીશ્વરઃ ॥ જીવ ઇતિ ચ
બ્રહ્મવિષ્ણ્વીશાનેન્દ્રાદીનાં નામરૂપદ્વારા
સ્થૂલોઽહમિતિ મિથ્યાધ્યાસવશાજ્જીવઃ ।સોઽહમેકોઽપિ
દેહારમ્ભકભેદવશાદ્બહુજીવઃ । પ્રકૃતિરિતિ ચ
બ્રહ્મણઃ સકાશાન્નાનાવિચિત્રજગન્નિર્માણ-
સામાર્થ્યબુદ્ધિરૂપા બ્રહ્મશક્તિરેવ પ્રકૃતિઃ ।
પરમાત્મેતિ ચ દેહાદેઃ પરતરત્વદ્બ્રાહ્મૈવ પરમાત્મા
સ બ્રહ્મા સ વિષ્ણુઃ સ ઇન્દ્રઃ સ શમનઃ સ સૂર્યઃ
સ ચન્દ્રસ્તે સુરાસ્તે અસુરાસ્તે પિશાચાસ્તે મનુષ્યાસ્તાઃ
સ્ત્રિયસ્તે પશ્વાદયસ્તત્સ્થાવરં તે બ્રાહ્મણાદયઃ ।
સર્વં ખલ્વિદં બ્રહ્મ નેહ નાનાસ્તિ કિઞ્ચન । જાતિરિતિ ચ ।
ન ચર્મણો ન રક્તસ્ય ન માંસસ્ય ન ચાસ્થિનઃ ।
ન જાતિરાત્મનો જાતિર્વ્યવહારપ્રકલ્પિતા । કર્મેતિ ચ
ક્રિયમાણેન્દ્રિયૈઃ કર્મણ્યહં કરોમીત્યધ્યાત્મનિષ્ઠતયા
કૃતં કર્મૈવ કર્મ । અકર્મેતિ ચ કર્તૃત્વભોક્તૃત્વા-
દ્યહઙ્કારતયા બન્ધરૂપં જન્માદિકારણં
નિત્યનૈમિત્તિકયાગવ્રતતપોદાનાદિષુ ફલાભિસન્ધાનં
યત્તદકર્મ ।
જ્ઞાનમિતિ ચ દેહેન્દ્રિયનિગ્રહસદ્ગુરૂપાસન-
શ્રવણમનનનિદિધ્યાસનૈર્યદ્યદૃગ્દૃશ્યસ્વરૂપં
સર્વાન્તરસ્થં સર્વસમં ઘટપટાદિપદાર્થ-
મિવાવિકારં વિકારેષુ ચૈતન્યં વિના કિઞ્ચિન્નાસ્તીતિ
સાક્ષાત્કારાનુભવો જ્ઞાનમ્ । અજ્ઞાનમિતિ ચ
રજ્જૌ સર્પભ્રાન્તિરિવાદ્વિતીયે સર્વાનુસ્યૂતે સર્વમયે
બ્રહ્મણિ દેવતિર્યઙ્નરસ્થાવરસ્ત્રીપુરુષવર્ણાશ્રમ-

બન્ધમોક્ષોપાધિનાનાત્મભેદકલ્પિત જ્ઞાનમજ્ઞાનમ્ ।
સુખમિતિ ચ સચ્ચિદાનન્દસ્વરૂપં જ્ઞાત્વાનન્દરૂપા
યા સ્થિતિઃ સૈવ સુખમ્ । દુઃખમિતિ અનાત્મરૂપઃ
વિષયસઙ્કલ્પ એવ દુઃખમ્ । સ્વર્ગ ઇતિ ચ સત્સંસર્ગઃ
સ્વર્ગઃ । નરક ઇતિ ચ અસત્સંસારવિષયજનસંસર્ગ એવ
નરકઃ । બન્ધ ઇતિ ચ અનાદ્યવિદ્યાવાસનયા જાતોઽહમિ-
ત્યાદિસઙ્કલ્પો બન્ધઃ । પિતૃમાતૃસહોદરદારાપત્ય-
ગૃહારામક્ષેત્રમમતા સંસારાવરણસઙ્કલ્પો બન્ધઃ ।
કર્તૃત્વાદ્યહઙ્કારસઙ્કલ્પો બન્ધઃ । અણિમાદ્યષ્ટૈશ્વ-
ર્યાશાસિદ્ધસઙ્કલ્પો બન્ધઃ । દેવમનુષ્યાદ્યુપાસના-
કામસઙ્કલ્પો બન્ધઃ । યમાદ્યષ્ટાઙ્ગયોગસઙ્કલ્પો
બન્ધઃ । વર્ણાશ્રમધર્મકર્મસઙ્કલ્પો બન્ધઃ ।
આજ્ઞાભયસંશયાત્મગુણસઙ્કલ્પો બન્ધઃ । યાગવ્રત-
તપોદાનવિધિવિધાનજ્ઞાનસમ્ભવો બન્ધઃ । કેવલમોક્ષા-
પેક્ષાસઙ્કલ્પો બન્ધઃ । સઙ્કલ્પમાત્રસંભવો બન્ધઃ ।
મોક્ષ ઇતિ ચ નિત્યાનિત્યવસ્તુવિચારાદનિત્યસંસારસુખ-
દુઃખવિષયસમસ્તક્ષેત્રમમતાબન્ધક્ષયો મોક્ષઃ ।
ઉપાસ્ય ઇતિ ચ સર્વશરીરસ્થચૈતન્યબ્રહ્મપ્રાપકો ગુરુરુપાસ્યઃ ।
શિષ્ય ઇતિ ચ વિદ્યાધ્વસ્તપ્રપઞ્ચાવગાહિતજ્ઞાનાવશિષ્ટં
બ્રહ્મૈવ શિષ્યઃ । વિદ્વાનિતિ ચ સર્વાન્તરસ્થસ્વસંવિદ્રૂપવિ-
દ્વિદ્વાન્ । મૂઢ ઇતિ ચ કર્તૃત્વાદ્યહઙ્કારભાવારૂઢો મૂઢઃ ।
આસુરમિતિ ચ બ્રહ્મવિષ્ણ્વીશાનેન્દ્રાદીના-
મૈશ્વર્યકામનયા નિરશનજપાગ્નિહોત્રાદિ-
ષ્વન્તરાત્માનં સન્તાપયતિ ચાત્યુગ્રરાગ-
દ્વેષવિહિંસા દમ્ભાદ્યપેક્ષિતં તપ આસુરમ્ ।
તપ ઇતિ ચ બ્રહ્મ સત્યં જગન્મિથ્યેત્યપરોક્ષ-
જ્ઞાનાગ્નિના બ્રહ્માદ્યૈશ્વર્યાશાસિદ્ધસઙ્કલ્પ-
બીજસન્તાપં તપઃ । પરમં પદમિતિ ચ
પ્રાણેન્દ્રિયાદ્યન્તઃકરણગુણાદેઃ પરતરં
સચ્ચિદાનન્દમયં નિત્યમુક્તબ્રહ્મસ્થાનં
પરમં પદમ્ । ગ્રાહ્યમિતિ ચ દેશકાલવસ્તુ-
પરિચ્છેદરાહિત્યચિન્માત્રસ્વરૂપં ગ્રાહ્યમ્ ।

અગ્રાહ્યમિતિ ચ સ્વસ્વરૂપવ્યતિરિક્તમાયામય-
બુદ્ધીન્દ્રિયગોચરજગત્સત્યત્વચિન્તનમગ્રાહ્યમ્ ।
સંન્યાસીતિ ચ સર્વધર્માન્પરિત્યજ્ય નિર્મમો
નિરહઙ્કારો ભૂત્વા બ્રહ્મેષ્ટં શરણમુપગમ્ય
તત્ત્વમસિ અહં બ્રહ્માસ્મિ સર્વં ખલ્વિદં બ્રહ્મ
નેહ નાનાસ્તિ કિઞ્ચનેત્યાદિમહાવાક્યાર્થા-
નુભવજ્ઞાનાદ્બ્રહ્મૈવાહમસ્મીતિ નિશ્ચિત્ય
નિર્વિકલ્પસમાધિના સ્વતન્ત્રો યતિશ્ચરતિ સ સંન્યાસી
સ મુક્તઃ સ પૂજ્યઃ સ યોગી સ પરમહંસઃ સોઽવધૂતઃ
સ બ્રાહ્મણ ઇતિ । ઇદં નિરાલમ્બોપનિષદં યોઽધીતે
ગુર્વનુગ્રહતઃ સોઽગ્નિપૂતો ભવતિ સ વાયુપૂતો ભવતિ
ન સ પુનરાવર્તતે ન સ પુનરાવર્તતે પુનર્નાભિજાયતે
પુનર્નાભિજાયત ઇત્યુપનિષત્ ॥

ૐ પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્પૂર્ણમુદચ્યતે ।
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇતિ નિરાલમ્બોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

*Niralamba Upanishad*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*